| एम०ए० संस्कृतम् | प्रश्नपत्रनाम- गद्यं तस्येतिहासश्च | परीक्षावर्षम् 2022 |
|---|---|---|
| तृतीय-सत्रम् | पेपर कोड- **MSA-C318** | |

समयः 03 घण्टा पूर्णाङ्कः 70

**विशेषः**- प्रश्नपत्रम् ए-बी इति खण्डद्वये विभक्तम्। प्रत्येकं खण्डः यथानिर्देशं करणीयः।

## खण्डः - ए

(लघूत्तरीयाः प्रश्नाः)

**विशेषः**- केचन पञ्च प्रश्नाः समाधेयाः। एकस्य प्रश्नस्य संस्कृते उत्तरम् अनिवार्यतया लेख्यम्। 5x06=30

प्रश्न 1 अधोलिखितस्य श्लोकस्य व्याख्या विधेया-

अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः॥

प्रश्न 2 अधोलिखितस्य गद्यस्य सप्रसंगं व्याख्या विधेया-

या च सप्तवर्षकल्पाम्, यावनत्रासेन निःशब्द रुदतीम्, परमसुन्दरीम्, कलितमानवदेहमिव सरस्वतीं सान्त्वयन् मरन्दमधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत्परिमार्गणीयान्येतस्याः पितरौ गृहं च।

प्रश्न 3 अधोलिखितस्य गद्यस्य सप्रसंगं व्याख्या विधेया-

सखे, किमिदमसाम्प्रतमसाधुजनोचितमध्वानमाश्रितोऽसि। तवैतच्चरितमालोक्य वितर्कडोलासु निवसन्ति सन्तः। खलाः पुनस्त्वदनुचितमनिष्टमाचारमाचरन्ति। अनिष्टोद्भावनरसोत्तरं हि भवति खलहृदयम्। को नामास्य तत्त्वनिरूपणे समर्थः। तथाहि। भीमोऽपि नबकद्वेषी, आश्रयाशोऽपि मातरिश्वा, अतिकटुकोऽपि महारसः। सर्षपस्नेहः इव करयुगलालितोऽपि शिरसा धृतोऽपि न काटवं जहाति। इत्यस्य गद्यांशस्य व्याख्या कार्या।

प्रश्न 4 अधोलिखितस्य गद्यस्य सप्रसंगं व्याख्या विधेया-

कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयं परस्सहस्रपुण्डरीकपटलपरिलसितं पतत्रिकुलकूजितपूजितं पयःपूरितं सर आसीत्। दक्षितश्चैको निर्झरझर्झरध्वनिध्वनितदिगन्तरः फलपटलास्वादचपलितचञ्चुपतङ्गकुलाक्रमणाधिकविनतशाखशाखिसमूहव्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

प्रश्न 5 अधोलिखितस्य गद्यस्य सप्रसंगं व्याख्या विधेया-

महावराहो गोत्रोद्धरणप्रवृत्तोऽपि गोत्रोद्दलनमकरोत्। राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश। भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत्। नलस्य दमन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः। पृथुरपि गोत्रसमुत्सारणविस्तारितभूमण्डलः। तदित्थं नास्ति वागवसरः पूर्वतरेषु राजसु। स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचक्रचरितः।

प्रश्न 6 अधोलिखितस्य गद्यस्य सप्रसंगं व्याख्या विधेया-

एनां च सुन्दरीमाकलय्य कोऽपि यवनतनयो नदीतटान्मातुर्हस्तादाच्छिद्य क्रन्दतीं नीत्वापससार। ततः किञ्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य बिभीषकयास्याः क्रन्दनकोलाहल शमयितुमियेष, तावदकस्मात्कोऽपि काललम्बल इव अल्लूको वनान्तादुपजगाम। दृष्ट्वैव यवनतनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमारुरोह।

प्रश्न 7 शिवराजविजयानुसारं सूर्योदयस्य वर्णनं कुरुत।

प्रश्न 8 वासवदत्तानुसारं खलानां स्वभावं निरूपयत।

प्रश्न 9 शिवराजविजयानुसारं योगिराजस्य चरित्रचित्रणं लिखत।

प्रश्न 10 वासवदत्तानुसारं नृपस्य चिन्तामणेः चरित्रचित्रणं लिखत।

**खण्डः - बी**

(दीर्घोत्तरीयाः प्रश्नाः)

**नोटः** केचन चत्वार प्रश्नाः समाधेयाः। एकस्य प्रश्नस्य संस्कृते उत्तरम् अनिवार्यतया लेख्यम्। 04x10=40

प्रश्न 1 वासवदत्तायाः चरित्रचित्रणं लिखत।

प्रश्न 2 शिवराजविजयस्य काव्यवैशिष्ट्यं प्रतिपादयत।

प्रश्न 3 शिवराजविजये वर्णितां भारतदशां लिखत।

प्रश्न 4 नृपस्य चिन्तामणेः सुराज्यं विस्तरेण लिखत।

प्रश्न 5 गद्यसाहित्ये वासवदत्तायाः महत्त्वं निरूपयत।

प्रश्न 6 वासवदत्तायां प्रयुक्तस्य श्लेषालङ्कारस्य छटां लिखत।

प्रश्न 7 कवेः सुबन्धोः काव्यशैलीं विवेचयत।

प्रश्न 8 शिवराजविजयानुसारं गौरसिंहस्य चरित्रचित्रणं लिखत।